National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 352-356
© 2026 NJHSR
www.sanskritarticle.com

डा. सुजितमिश्रः
बि.जे.बि स्वयंशासितमहाविद्यालयः,
भुवनेश्वरम्

Correspondence:
डा. सुजितमिश्रः
बि.जे.बि स्वयंशासितमहाविद्यालयः,
भुवनेश्वरम्

# संस्कृतकाव्यशास्त्राणां वा अलङ्कारशास्त्रस्य गतिः प्रवृत्तिश्च

डा. सुजितमिश्रः

## १.० उपक्रमः

साहित्यशास्त्रं शास्त्रन्तराणीव परमोपादेयं शास्त्रम्। लौकिकानां वैदिकानाञ्च शास्त्राणां सर्वाङ्गीणतया ज्ञानं तावन्न भवितुमर्हति यावदस्य अलङ्कारशास्त्रस्य ज्ञानं न वर्तते । अलङ्कारशास्त्रस्य प्रख्याताचार्यो भामहः स्वस्य ग्रन्थस्य नाम काव्यालङ्कार इत्यकार्षीत् । रुद्रटस्यापि काव्यशास्त्रविषयकस्य ग्रन्थस्य नाम काव्यालङ्कार एवास्ते । काव्यशास्त्रमिदं स्वोत्पत्तिसमयादेव नितरां लोकप्रियताङ्गतं तस्मादेतत् काव्यालङ्कारकाव्यशास्त्रक्रिया-कल्प-साहित्यविद्यालङ्कारशास्त्रसाहित्यशास्त्रादि कतिपय नामभिः ससमानं सानुरागञ्च समाहतमभूत् । एतादृशानि वेदवाक्यानि काव्यशास्त्रानभिज्ञो जनः ज्ञातुं न प्रभवति । तानि भवन्ति -

'उतत्वः पश्यन् न ददर्श वाचम् ....
'जायेव पत्ये उषत्ती सुवासा....
"द्वासुपर्णा सयुजा सखाया.... इत्यादिनी ॥

अलङ्कारशास्त्राणां वैशिष्ट्यं स्वीकृत्य, राजशेखरः शास्त्रमिदं वेदाङ्गत्वेन मन्यते। तेनोक्तम्- 'उपकारकत्वादलङ्कारः सप्तममनुमिति, ऋते च तत्स्व रूपपरिज्ञानादेवार्थनवगतिः । सः काव्यशास्त्रशिक्षां स्वतन्त्रविद्यामेव न मन्यते अपितु तर्कत्रयीवार्तादण्डनीतिनामधेयानां चतसृणामपि विधानां निस्यन्दमवगच्छति । सः काव्यमीमांसायां लिखति 'पञ्चमी साहित्यविद्या इति यायावरीयाः, सा हि चतसृणामपि विधानां निस्यन्दः'। यथा 'प्रमाण-प्रमेय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थान-रूपाणां षोडशपदार्थानां प्रतिपादकमपि गौतमशास्त्रं पदार्थानुमानपर्यायस्य न्यायस्य सकल विद्यानुग्राहकतया सर्वकर्मानुष्टानसाधनतया च तत्र शास्त्रे प्रधानत्वेन न्यायशास्त्रमिति व्यपदिश्यते। प्राधान्येन व्यपदेशा भवन्तीति न्यायात् तद्वत् दोषगुणादीनां प्रतिपादकमपि शास्त्रमिदं यमकोपमादीनामलंङ्काराणां भूयो विषयकतया काव्यव्यवहारप्रयोजकतया चात्र शास्त्रे प्राधान्येन तत्प्रतिपादकत्वादेव अलङ्कारशास्त्रमिति प्रतिपाद्यते ।

अलङ्कारशास्त्राणां वैशिष्ट्यं प्रतिपादयितुं राजशेखरः स्वस्य काव्यमीमांसायां कथयति 'शब्दार्थयो यथावत् सहभावेन विद्या साहित्यविद्या'[1]।

शृङ्गारप्रकाशग्रन्थे आचार्य भोजः कथयति शब्दार्थेन सह यस्य सम्बन्धः तत् साहित्यम्। एतत् द्वादशप्रकारकम् अभिधाविवक्षातात्पर्याप्रविभागव्यपेक्षा सामर्थ्यान्वियैकार्थीभावदोषहीनो गुण उपादन अलङ्कारयोग रसावियोगश्च । अत्र प्रथमतः अष्टसंख्यकं यावत् व्याकरणार्थं शब्दार्थसम्वन्धः अवशिष्टाः चत्वारः अलङ्कारगतशब्दार्थसम्वन्धाः भवन्ति वक्रोक्तिकारः कुन्तकः अपि अलङ्कारशास्त्राणां वैशिष्ट्यं प्रतिपादयति । तेनोक्तं -

'साहित्यं अनयोः शोभाशालितां प्रति काप्यसौ अन्यूनानतिरिक्तित्वं मनोहारिणीवस्थितिः ।[2]

अर्थात् साहित्यं भवति शब्दार्थयुगलयोः अलौकिकविन्यासभङ्गी यत् अन्यूनातिरिक्तृत्वं वर्जितः सत् मनोहारिणी शोभातिशालित्वेन च परिवर्तते ।

अतः भारतीयालङ्कारशास्त्रे काव्यस्य प्रमुखोद्देश्यं तु परमानन्दप्राप्रिरित्यभिहितम् । पाश्चात्यकवयः सौन्दर्यशास्त्रज्ञाः काव्यानन्दं (Pleasure) इत्यामनन्ति ।

यदुक्तं पाश्चात्य विद्वांसः आरिपृटल महोदयेन-
The object of poetry, as of all the fine arts, to produce an emotional delight, a pure and elevated Pleasure.[3]
आङ्लकविः वाड्सवार्थ स्वकीयस्य (Poetry and Poetic diction) इति ग्रन्थे लिखति - Whatever passion be Communicates to his reader, those passions, if his readers mind be Sound and vigorous. Should always, be accompanied with an over balance pleasure. कविः शेली 'Poetry is ever accompained with pleasure इत्युक्तवान् । अपिच क्रोचे - Pure poetic joy, अर्थात् विशुद्धः काव्यानन्दः इति स्वकीयानि मतानुपस्थापयन्ति ।

पाश्चात्यसौन्दर्यतत्वज्ञाः अस्माकम् अलङ्कारशास्त्रान् स्वौन्दर्य-शास्त्रत्वेन स्वीकुर्वन्ति । पाश्चात्य कविः W.B. Yeats इत्यस्य मतेन - 'In aesthetic experience emotions do stir in an agitate our mind, bat they don't move out in the form of action'.
किन्तु भारतीयानां सौन्दर्य ज्ञानं नास्तीति या धारणा पाश्चात्य गरेषकाणां माकसमुलर महोदयानां चासीत् नतु भ्रान्त मूलकं वर्तते । तेनोक्तम् -"The idea of beautiful in nature didn't exist in Hindu mind' इति ।
परन्तु वयं यदि अस्माकं अलङ्कारशास्त्रान् पश्यामः। नहि तत्र एतादेशानां वाक्यांना खण्डनं भविष्यति ।
लक्षण ग्रन्थे सन्ति वहुमतवादाः तद्यथा- 'सौन्दर्यम् अलङ्कारः' इत्यत्र साक्षात् सौन्दर्यशब्दस्य प्रयोगः जातः। 'काव्यशोभाकरान् धर्मान् अलङ्कारात् प्रचक्षते' इति दण्डिनोक्तम् । अत्र सौन्दर्यस्थाने शोभेत्यस्य शब्दस्य दण्डिना प्रयोगः कृतः ।
सामग्रिकरूपेण भारतीयालङ्कारशास्त्रेषु स्थितेनालौकिकशब्देन सौन्दर्यतत्वं विश्लेषितं दृश्यते। किं बहुना लक्ष्यग्रन्थस्य नाम काव्यमहाकाव्यनाटकखण्डकाव्यादीनां? काव्येषु सौन्दर्यस्य साक्षात् प्रयोगः प्रतिशब्दोऽपि दृश्यन्ते कालिदासेन सौन्दर्यस्य प्रतिशब्दः चारुः रमणीयेति स्वकीयस्य काव्यनाटके व्यवहृतः तद्यथा-
'रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् ।
पर्यत्सूकी भवति यत् सुखितोऽपि जन्तुः ॥'[4]

'प्रियेषु सौभाग्यफला हि चारुता'[5]

तदनु अस्य शास्त्रस्य अपरं नाम साहित्यशास्त्रम्। किं नाम साहित्यम्। आलोचकानां मतेन साहित्यशब्दस्य चतुर्दशाः अर्थाः भवितुमर्हति । सहितयोः मञ्जुलतरशब्दार्थयोर्भावः साहित्यम्॥ सहित शब्दतः भावे ष्यञ् प्रत्ययकृते साहित्यपदस्य निष्पतिर्जायते।
अपि च केचन शास्त्रमिदं काव्यक्रिया क्रियाकल्पश्चेति आमनन्ति। यदुक्तं रामायणे उत्तरकाण्डे-
'क्रियाकल्पविदश्चैव तथा काव्यविदो जनान् ॥'[6]

ये काव्यशास्त्रविज्ञानं जानन्ति ते खलु काव्यविद् भवितुमर्हन्ति कि नाम क्रियाकल्पः। क्रिया नाम संस्कारः। कल्पो नाम पद्धतिः (Procedure), यदुक्तं विष्णुपुराणे 'पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः ।[7] वख्यः क्रियाः क्रियापद्धतयः सन्ति याः खलु मृत्योत्तराः मृत्युसमये धातुष्टिताः भवन्ति । अतः कियाकल्पस्य महत्त्वं तदानींतनसमाजे संस्कारपद्धतौ वरीवर्त्ति । वेदाङ्गशास्त्रे क्रियाकल्प श्राद्धकल्पशब्देनाभिहितम्। परन्तु परवर्तिनीकाले भागवतमहापुराणस्य टीकाकाराः क्रियाकल्पशब्दं क्रियाविकल्प-शब्दत्वेन प्रयोगमकुर्वन्। अतः परस्मिन् काले अयम् अलङ्कार-शास्त्रत्वेन अभिहितः ।

अलङ्कारशास्त्राणां पञ्चप्रस्थानानि सन्ति। प्रथमः शब्दार्थ-साहित्यप्रस्थानं, द्वितीयः- शब्दप्राधान्यप्रस्थानं, तृतीयः – रसप्रस्थानं, चतुर्थः- ध्वनिप्रस्थानम्, पञ्चमः- ध्वनिध्वंसप्रस्थानञ्चेति।
१.शब्दार्थसाहित्यप्रस्थाने प्राचीनतमः ग्रन्थः काव्यालङ्कारः भामहस्य । तस्य प्रागेव बहवः आचार्यः आसन् परन्तु तेषां तस्य काव्यालङ्कारात् प्राचीनतमः ग्रन्थः एयावत् अनुपलब्धः ।
२. शब्दप्राधान्यप्रश्थाने शब्दं काव्यस्य शरीरमिति आचार्यदण्डिना प्रतिपादितम्। तेनोक्तम् शरीरं तावदिष्टार्थव्यवच्छिशापदावली।[8] पण्डिराजजगन्नाथोऽपि शब्दप्राधान्यप्रस्थानस्य प्रसिद्धः आचार्यः। तनोक्तं रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति साक्षादेव शब्दस्य प्राधान्यतां स्वीकरोति ।
३. रसप्रस्थाने भरतमुनेः आनन्दवर्धनात् आरभ्य सर्वे आलंकारिकाः स्वीकुर्वन्ति । अग्निपुराणेऽपि उक्तम् – 'वाग् वैदग्ध्य प्रधान्येऽपि रस एवात्र जीवितम्' अनेनवाक्येन प्रतिपाद्यते यत्- शब्दचातुर्यप्रधानः सन्नपि रसः काव्यस्य जीवनमिति । धनितत्वविरोधिनः भट्टनायकः महिमभट्टोऽपि रसैव काव्यस्थात्मा इत्योमनन्ति । तद्यथा - 'काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः ।'
४.ध्वनिप्रस्थानस्य प्रतिष्ठापकः आनन्दवर्धनाचार्यः। प्रागेव ध्वनिमतम् अपरे आचार्याः स्वीकृतवन्तेति आनन्दवर्धनेन उदाहृतम्। 'काव्यस्यात्मा ध्वनिरिति बुधै यः समाम्नान पूर्वम् ।'
५. ध्वनिध्वंसप्रस्थाने भट्टनायकः महिमभट्टः क्षेमेन्द्रः कुन्तकादयः आचार्याः प्रसिद्धाः । ते ध्वनिमतं न स्वीकुर्वन्ति । महिमभट्टस्य मतेन व्यञ्जनाव्यापारः अनुमानात् न भिन्नम् अस्ति ।
एते अभिधानादिनः अभिधा हि शब्दस्य एकैव शक्तिरिति स्वीकुर्वन्ति। अनुमानवलेन अभिधेयार्थान् हेतुं कृत्वा लक्षार्थं व्ययार्थत्र प्रतीयते इति एतेषां मतमस्ति ।

**१.१. अलङ्कारशास्त्रस्य क्रमविकाशः**

वस्तुतः अलङ्कारशास्त्राणामुद्भवः वेदेषु दृश्यते । भरतोऽपि वेदं दृश्यकाव्यस्योत्पत्तिस्थलं मन्यते । यदुक्तं –
जग्राह पाठ्यमृग्वेदात् सामेभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथवेणादपि ॥[9]

ऋगवेदस्य अस्मिन्नेव मन्त्रे उत्तमकाव्यस्य सकलं तत्वं निहितमस्ति । अत्र शृङ्गारवात्सल्यरसयोः अभिव्यक्तिः माधुर्यगुणस्योपमा-लङ्कारस्य च सन्निवेशोऽस्ति । तद्यथा –
प्र पर्वतानामुशती उपस्तादश्वे इव विशिते हासमाने ।
गावेव शुभ्रे मातरारिहाणे विवाद्शुतुद्री पयसा जवेते ॥[10]

पुनश्च सौन्दर्यसपन्नातिशयोक्तेः वर्णनं चत्वारिशृङ्गा इति मन्त्रे कृतम्। तद्यथा –
चत्वारि शृङ्गा त्रयोऽस्य पादाः द्वे शीर्षे सप्तहस्तासोऽस्य ।

त्रिधा बद्धो वृषभी रोरवीति महादेवमर्त्यो आ विवेश ॥[11]

किं बहुना ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्ते नवममन्त्रे अस्त्युपमालङ्कारस्य प्रयोगः तद्यथा

'स नः पितेव सुनवेग्ने सूपायनो भव सचस्वा नः स्वस्तये ।।[12]

अत्राग्निः उपमेयः, पिता उपमानः, सूपायनः शोभनप्रापकत्वधर्मः साधारणधर्मः, इव औपम्यवाचकशब्दः। अतः उपमालङ्कारः। अनेन नैकानि उदाहरणनि वेदेषु दरीदृश्यते। अलङ्कारशास्त्रस्य पल्लवनं परवर्त्तिरामायणमहाभारतप्रभृतिषु उपजीव्यलक्षणग्रन्थेषु निःश्व-प्रयतया दृश्यते । अस्मिन् समये यः विकाशः अभूत् सः मुख्यतः चतुर्धा विभज्यते ।

१. प्रारम्भिककालः,

२. रचनात्मककालः,

३. निर्णयात्मककालः

४. उत्तरकालश्चेति ।

क) प्रारम्भिककालः आभरतात् भामहदण्डीवामनरुद्रटभटोद्भटं पर्यन्तं विभज्यते। काव्यशास्त्रस्योत्पत्तिमधिकृत्य कालोउयं प्रारभते। नाट्यशास्त्रात् प्राक कोपि गन्धाः नोपलब्धाः। अस्मिन्नेव काले दावेव काव्यशास्त्रकारी भरतभामहौ आस्ताम्। भरतस्य नाटयशास्त्र वस्तुतः अलङ्कारशास्त्राणां बीजभुतमेव ।

ख) रचनात्मककालः भामहादारभ्य आनन्दवर्धनं यावत् प्रवर्तते । अत्र काव्य विचारे अनेकेषां सम्प्रदायानां विकाशोऽभूत् । (५५०- ६५०)

(ग)निर्णयात्मक कालः – कालोऽयं सर्वेभ्यो महत्वपूर्णः। आनन्दवर्धनादारभ्य मम्मट्टयावत् कालोऽयं प्रवहति (६५०-९५०)

(घ)उत्तरकालः ममट्टाचार्यादारभ्य अद्य यावत् अलङ्कारशास्त्रस्य उत्तरकालः। (९५०-२००१)

### १.२. अलङ्कारशास्त्रे संम्प्रदायः :

कतिपयाः विद्वांसः अलंकारशास्त्रे संम्प्रदायान् न स्वीकुर्वन्ति । सर्वे खलु काव्यशास्त्रकाराः रसगुणरीतिरलङ्कारादि विषयेषु एकमत मासति विचारः । परन्तु काव्यस्यात्मा प्रसङ्गे कैषांचन आचार्याणां मतानि भिन्नानि सन्ति। यथा 'रीतिरात्मा काव्यस्य', 'काव्यस्यात्मा-ध्वनिरिति', वाक्यरसात्मकं काव्यम्। कुन्तकेन वक्रोक्तिकाव्य-जीवितमिति स्वीकृतम्। यथा वेदान्तसम्प्रदाये शङ्करभास्कर-रामानुजमाध्वाचार्यवल्लभादीनां सम्प्रदायाः वर्तन्ते ते सर्वे उपनिषदां वेदान्तसूत्रस्य त त्वरिस्वीकुर्वन्ति, तथा अलङ्कएशास्त्र षट्सम्प्रदायाः सन्ति परन्तु ते सर्वे रसरीतिध्वन्यलंकाराणां महत्वं स्वीकुर्वन्ति । एते षट् सम्प्रदायाः सन्ति १. रससम्प्रदायः, २. अलङ्कारसम्प्रदायः, ३. रीतिसम्प्रदायः, ४. वक्रोक्तिसम्प्रदायः, ५. ध्वनि सम्प्रदायः, ६. औचित्यसम्प्रदायचेति ।

रससम्प्रदायस्य प्रमुख संस्थापकः भवति भरतमुनिः। अलङ्कारसम्प्रदाय भामहाचार्यः स्वस्य काव्यालङ्कारं प्रणिनाय। रीतिसम्प्रदायस्य संस्थापकः वामन आसीत्। वामनस्य रीतिसम्प्रदायात् परं वक्रोक्तिसम्प्रदायस्य संस्थापकः कुन्तकः आविर्वभूत । ध्वनिसम्प्रदायस्य आचार्यानन्दवर्धनासीत् । अस्य मतेन काव्यस्यात्मा ध्वनिरिति । औचित्यसम्प्रदायस्य प्रमुखाचार्यः क्षेमेन्द्रः आसीत् ।

### १.३. प्राचीनकाले प्रमुख आलङ्कारिकाः

भरतमुनेः प्राक् केचन आलङ्कारिकाणां सूचना संस्कृतवाङ्मये उपलभ्यन्ते । परन्तु तेषां कृतयः अनुपलब्धाः सन्ति । ते भवन्ति शिलाली कुशाश्वः वृद्धभरततण्डुनन्दिकेश्वर मतङ्गभरतादयः १९३४ तमे सम्वत्सरे कलिकतायां नन्दिकेश्वरस्य 'अभिनयदर्पणः' प्रकाशितः।

१. **भरतः** - भरतस्य नाट्यशास्त्रं प्रसिद्धमस्ति । प्रसिद्धविद्वान् पि.भि. काणे मतानुसार एतस्य आचार्यस्य समयः तृतीय शतकमासीत् ।

२. **कोहलः** - भरतस्य पुत्रेषु कोहलः अन्यतमः। अस्य नाम कुट्टनीमतम् अभिनवभारती, संगीतरत्नाकरादिषु शास्त्रेषु उल्लिखितमस्ति । परन्तु अस्य कृतयः अनुपलब्धाः ।

३. **मेधावीरुद्रः** - अस्य नाम राजशेखरस्य ग्रन्थादुपलभ्यते । अस्य आचार्यस्य मुख्यसिद्धान्ताः उपलभ्यते । परन्तु अस्य मूलग्रन्थस्तु अनुपलब्धः।

४. **भामहः** - भरतमुनेरनन्तरं द्वितीयः आचार्यः भामहः । अस्य कृतिस्तु काव्यालङ्कारः । अस्याचार्यस्य समयः (५०० - ६२०) मध्ये आसीत् ।

५. **दण्डी** - भामहात् परं दण्डी अलङ्कारशास्त्रस्य प्रसिद्धदाचार्यः । अष्टमशताब्द्यां स आसीत्। अस्याचार्यस्य कृतिः काव्यादर्श अस्ति ।

६. **भट्टोद्भटः -** अस्याचार्यस्य समयः अष्टमशताब्द्याः अथवा नवमशताब्धाः प्रथमभागे भवेदिति अनुमीयते। अस्यालङ्कार-ग्रन्थः काव्यालङ्कारसारसंग्रहश्चेति ।

७. **वामनः** - अलंकारशास्त्रस्येतिहासे वामनाचार्यस्य स्थानं महत्वपूर्णमस्ति । वामनस्य समयः ७७९ तः ८१३ तमे खीष्टाब्दे आसीदित्यनुमीयते। अस्य कृतिः काव्यालङ्कारसूत्रवृतिः अस्ति ।

८. **रुदटः** - रुद्रटस्य कालः ८८० तः ९२० शताब्दी मध्ये आसीत् इति अनुमीयते । अस्य कृतिः रुद्रटकाव्यालङ्कार अस्ति ।

९. **आनन्दवर्धनः** - ध्वनितत्वप्रस्थापकः आनन्दवर्धनस्य कालः ८५५-८८४ मध्ये आसीत् । अस्य ध्वन्यालोकेति प्रसिद्धः ग्रन्थः।

१०. **मुकुलभट्टः** - अस्य एका एव कृतिः अभिधावृत्ति मातृका । अत्त पञ्चदशाः कारिकाः सन्ति । अस्चार्यस्य समयः ८५५-८८३ मध्ये आसीत् ।

११. **भट्टतौतः -** अस्य ग्रन्थस्य नाम काव्यकौस्तुभम् । समयः - नवम शताब्दी

१२. भट्टनायकः - ग्रन्थः – हृदयदर्पणः । समयः - ८५०-९८० मध्ये ।

१३. राजशेखरः - ग्रन्थः – काव्यमीमांसा । समयः-८९०-९०८ मध्ये ।

१४. अभिनवगुप्तः – ग्रन्थः तन्त्रालोकः । समयः - ९८०-१०१० मध्ये।

१५. कुन्तकः - ग्रन्थः – वक्रोक्तिजीवितम् । समयः ९५0शताब्दी ।

१६. महिमभट्टः - ग्रन्थः – व्यक्तिविवेकः । समयः-१०२०-१०८० मध्ये ।

१७. भोजः - ग्रन्थः - श्वहारप्रकाशः, सरस्वतीकण्ठाभारणश्च । समयः-१०१०-१०५५ मध्ये ।

१८.क्षेमेन्द्रः- ग्रन्थः- औचित्यविचारचर्चा । समयः - १०२० - १०६६ मध्ये

१९.मम्मट्टः- ग्रन्थः - काव्यप्रकाशः । समयः १०५०-११०० मध्ये

२०.रुय्यकः - ग्रन्थः - अनुसारसर्वस्वम् । समयः - द्वादशशताब्द्याः मध्यभागे

२१.वाग्भटः- ग्रन्थः – काव्यानुशासनम्, वाग्भट्टालङ्कारः । समयः- चतुर्दश शताब्दी

२२.हेमचन्द्रः - ग्रन्थः - काव्यानुशासनम् । समयः - १०८८ तमे शकाब्दे ।

२३.अमरचन्दः- ग्रन्थ -काव्यकल्पलता (नोपलभ्यते)। समयः त्रयोदशताब्दी ।

२४.देवेश्वरः- ग्रन्थः - कविकल्पलता । समयः – चतुर्दशशतकम् ।

२५.धनञ्जयः - ग्रन्थः - दशरूपकः। समयः - दशमशताब्धाः अन्तिम-भागः ।

२६.धनिकः - ग्रन्थः - दशख्यकावलोकः । समयः- एकादशशताब्दी ।

२७.रामचन्द्र गुणचन्द्र - ग्रन्थः नाट्यदर्पणः। समयः - ११००-११७५ मध्ये ।

२८.जयदेवः ग्रन्थः – चन्द्रालोकः।

२९.विद्यानाथः - ग्रन्थः – प्रतापरुद्रयशोभूषणम् । समयः-१२९८-१३१७ मध्ये ।

३०.केशवमिश्रः - ग्रन्थः - अलंकारशेखरः । समयः षाडश शताब्धी ।

३१.शारदातनयः- ग्रन्थ- भावप्रकाशः (नाट्यविषयकग्रन्थः) । समयः- चतुर्दशशताब्दी ।

३२.सिंहभूपालः - ग्रन्थः - रसार्ण वसुधाकरः (नाट्यविषयकग्रन्थः) । समयः – चतुर्दशशताब्दी ।

३३.भानुदत्तः - ग्रन्थः - रसमञ्जरी । समयः- चतुर्दशशताब्दी ।

३४.रुपगोस्वामी - ग्रन्थः – भक्तिरसामृतसिन्धुः/ उज्वलनिलमणिः (वैष्णवीयालङ्कारशास्त्रम्)। समयः १५००-१६०० मध्ये ।

३५.कर्णपुरः - ग्रन्थः - काव्यकौस्तुभः / अलङ्कारकौस्तुभः । समयः – षोडश।

३६.कविचन्द्रः - ग्रन्थः - काव्यचन्दिका । समयः - षोडश

३७.अप्ययदीक्षितः - ग्रन्थः - वृत्तिवात्तिक, चित्रमिमांसा, कुवलया-नन्दश्च। समयः - १६००-१७००)

३८.आशाधिर भट्टः - ग्रन्थः – कोविदानन्दः। समयः - अष्टादशशताब्दी

३९.पण्डितराज जगन्नाथः - ग्रन्थः – रसगङ्गाधरः। (१६2०-१६८० मध्ये)

४०.नागेशभट्टः – ग्रन्थः – अलंकारसुधा । समयः - सप्तदशशताब्दी

४१.विश्वेश्वरः – ग्रन्थाः - अलंकार कौस्तुभः, अलंकारमुक्तावली, काव्यरत्नम्, रसचन्द्रिका

४२.रुद्रभट्टः – ग्रन्थः रसकलिका

**उत्कलीय आलंकारिकाः**

१.विद्याधरः - एकावली रचयिता विद्याधरः बहुप्रसिद्धः। त्रयोदशशतकस्यान्तिमभागे एकावली रचिता। तत्कालिक तथ्यानुसारं विद्याधरस्य तथा तस्य रचनायाः समयः १२८० तः १३२५ शताब्दी मध्ये एवं भवितु मर्हति ।

२. विश्वनाथकविराजः - अनेन सुप्रसिद्ध अलंकारग्रन्थः साहित्यदर्पणः विरचितः । ग्रन्थरचनायां विश्वनाथेन प्राचीनालंकारिकाणां मतानि अनुसृतानि तथापि तत्र स्ववैशिष्ट्यं विद्यते ।

३.रघुनाथदासः - रघुनाथदासः धर्मशास्त्र पारावारिणः भगवन्नृसिं-हस्य परमभक्तः गदाधरस्य पुत्रश्चासीत् । अस्य कृतयः भवन्ति - कालनिर्णयः, उत्पात्ततरङ्गिणी, साहित्यभूषणः, नलोदयटीका रघुवंशटीका न्यायरत्नावली अमरकोषटीकादयः ।

४.वलदेवविद्याभूषणस्य काव्यकौस्तुभ साहित्यकौमुदी च अयं वैष्णव कविरासी । अस्यकृतिदयम् - काव्यकौस्तुभ साहित्य कौमुदीच

5.जगन्नाथ मिश्रस्य रसकल्पद्रुमः रसकल्पद्मः जगन्नाथ मिश्रस्य प्रसिद्धा कृति अस्ति । अत्र सम्पूर्णः विषयः रससिद्धान्त निर्णयितुं कृतसिद्धः अस्ति । अपरः रसकल्पद्रुमः राजस्थान वास्तव्यः चतुर्भुज मिश्रण विरचितः ।

अपरे उत्कलीय आलंकारिकाः तेषां नामानि अत्र सूचयामि । यथा कृष्णमिश्रस्य साहित्यरत्नाकरग्रन्थस्य सुधाकरटीका, गङ्गादासस्य छन्दोमञ्जरी, गोविन्दमिश्रस्य शृङ्गार रसदीपिका, चिन्तामणि मिश्रस्य वाङ्मयविवेकः, विश्वनाथः सामन्तरायस्य काव्यप्रकाश-विवरणटीका ग्रन्थः। अस्माकं गुरवः डा. सुरेन्द्र नाथ षडङ्गि पादेन सम्पादितः वर्त्तते। भागिरथस्य अलङ्कारमीमांसा, महामहिम-चण्डिदासस्य काव्यप्रकाशदीपिका, रामचन्द्रखड़गरायस्य अलकांर-चिन्तामणिग्रन्थः, रामचन्द्रन्यायवागीशस्य काव्यचन्द्रिका, पुनः लोकनाथ दीक्षितस्य साहित्यादर्शः, सामन्त जगन्नाथमहापात्रस्य रसपरिच्छेदः, सिंहभुपालस्य रसार्णवसुधाकरः, कविभूषणगोपि-नाथस्य कविचिन्तामणिः अयं उत्कलीयः गङ्गवंश नरसिंहदेवस्य सभाकविरासीत् । सः स्वकीय ग्रन्थे रससिद्धान्तं स्वीकृतवान् ।

**१.५. वर्त्तमानकाले काव्यशास्त्रकाराः-**

अधुनातन समये ये खलु आलङ्कारिकाः सन्ति तेषां विषये यदि वयं पर्यालोचनां कुर्मः तर्हि तेषु प्रमुखतः रेवाप्रसादद्विवेदी प्रो. राधावल्लभत्रिपाठी, अभिराजराजेन्द्रमिश्रादयः प्रमुखाः सन्ति, तेषां कृतिविषये विहङ्गालोकनं अत्र क्रियते मया।

क) रेवाप्रसाद द्विवेदी- साम्प्रतिककाले परमविद्वान् रेवाप्रसाद द्विवेदी महाभागाः अलङ्कारशास्त्राणां विरचने प्रमुखतां भजन्ते। तस्य काव्यालंकारकारिकायां अलङ्कारस्तु काव्यस्यात्मेति प्रथमतया नूतनतया तेनाभिहितम् । This *Kāvya* is presenting new theories on Sanskrit Poetics, upholding *Ala±kāra* as the Soul of poetry..

i. अलं ब्रह्म काव्याशास्त्रे नूतन तथ्यानां आविष्कारं तेन कृतम् ।

ii. नाट्यानुशासनम् नाट्यशास्त्रनियमवद्धोऽयं काव्यशास्त्रं वर्तते ।

iii. सौन्दर्यपञ्चाशिका सौन्दर्यज्ञानविषये अभिनव तथ्यम्

iv. साहित्यालङ्कारः साहित्यशास्त्राणां इतिहासः अत्र समुपस्थापितः

ख) प्रो. राधावल्लभ त्रिपाठी - साम्प्रतिककाले प्रो. राधावल्लभ त्रिपाठी महोदयेन अभिनवकाव्यालांकारसूत्रमिति ग्रन्थः विरचितः। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणासी पक्षतः प्रकाशितः ग्रन्थोऽयम्। काव्यशास्त्रमिदं नूतनत्वमवधारयति। अत्र त्रयोदशा-ध्यायाः सन्ति।काव्यलक्षणनिरुपणं,काव्यप्रयोजन,काव्यकारण, काव्य-भेद, शब्दव्यापार, शास्त्रसङ्गतिः, अलङ्कारस्वरूपम्, कविव्यापार, अलम्भाव, अलङ्कारविभागनिरुपणं, अभ्यन्तरालंकार, वाल्या--लङ्कार, काव्यविमर्शति विषयाः अत्र सन्निवेशिताः ।

ग)अभिराजराजेन्द्रमिश्रः - अनेन विदुषा नाट्यपञ्चगव्यम् नाट्यपञ्चमित्रमिति काव्यशास्त्रद्वयं विरचितम् । मृदुस्मिता भरद्वाज इत्यनया अपि अभिराजयशोभूषणमिति काव्यशास्त्रं विरचितम् । अत्रकाव्यस्वरूपं काव्यहेतुः प्रसङ्गादयः सन्निवेशितः । अपि च आधुनिकी गलज्जलिका छन्दमुक्तकाव्यं लेखितुं नियमाः अत्र सन्निवेशिताः दृश्यन्ते ।

**१.६. इतरासु प्रादेशिक भाषासु अलङ्कारशास्त्राणि**

ओडिआभाषायां काव्यसम्वादेति ओडिआभाषाविद्वान् दाशरथि दाशेन लिखितम् । ग्रन्थोऽयं सौन्दर्यशास्त्रसिद्धान्तं सूचयति अत्रापि संस्कृत अलंकारशास्त्रस्य प्रभावः दृश्यते । वाङ्गलाभाषाया केचन विद्वांसः अलङ्कारग्रन्थान् प्रचितवन्तः । ते सन्ति-

१ . काव्यविचारः - सुरेन्द्रनाथ दासगुप्ता
२. साहित्य मीमांसा - विश्णुपद भट्टाचार्यः
३. अलंकारचन्द्रिका - श्यामपद चक्रवर्ती
४. काव्यालोकः - सुधीरकुमार दासगुप्ता
५. रससमीक्षा – रामरञ्जन मुखोपाध्याय
६. अलकार अन्वेषा - नरेन् विश्वास
७. नाटयशास्त्रम् - एस्. सि. वानार्जी

कन्नडभाषायां ८५० तमे शतके कविराजमार्गः इति काव्यशास्त्रं तदानीन्तन राष्ट्रकुटराज्ञा अमोघवर्श इत्यनेन लिखितमिति प्रसिद्धिरस्ति । अयं ग्रन्थः व्याकरणालङ्कारशास्त्राभ्यां समलंकृतः । केचन ऐतिहासिकाः अयं ग्रन्थः संस्कृतग्रन्थः काव्यादर्शानुकरणेन लिखितेति मतपोषणं कुर्वन्ति ।

**१.७. पाश्चात्यालङ्कारिकाः तेषामभिमतञ्च**

पाश्चात्यकाव्यालङ्कारिकेषु आरिष्टटल, वार्डस् ओर्थ, शैली, क्रोचे, मेथ्यु आर्नोल्ड प्रभृतयः प्रमुखाः सन्ति । वस्तुतः एते आलंकारिकाः न अपितु सौन्दर्यशास्त्राभिज्ञाः भवन्ति ।

आमेरिकीयविद्वान् सुशान् सौन्दर्यतत्वविषये गवेषणां विधायं तत्वमिदं गुरुत्वपूर्णजीवनं (vital life) इति प्रतिपादितम् । तस्य Aesthetic theory of Art इति पुस्तके Feeling and form प्रसंगे, सः काव्यानुभवं प्रकटीचकार । तद्यथा-

The former and fragmentary, transient and often indefinite But the poet's business is to Great the appearance of experiences of semblance of event lived and felt, and to organize them so they Constitute a purely and Completely experienced reality, a piece of Virtual life.[13]

आरिष्टोटल, वोर्डस्वार्थ इत्यनयोः मतानि मया प्रागेव प्रस्तुतानि । परन्तु अत्र धेयं यन् तत्र पाश्च्यातानां बहुमतवादाः सन्ति । तत्र तत्र मया विहङ्गावलोकनं कृतम् - तद्यथा

१. कलाकैवल्यवादः (Art for Art's sake), २. शास्त्रवादी चेतना (Classicism), ३. स्वछन्दतावादः (Romanticism), ४. चित्रकल्पवादः (Ionagism), ५. मिथ् (Myth), ६. आर्कियइप् (Archetype) - आदिरुपम्., ७. यथार्थवादः (Realism), ८. प्रकृतिवादः (Naturalism), ९. अतियथार्थवादः (Surrealism), १०. प्रतीकवादः (Symbolism), ११. विच्छिन्नतावादः (Alienationism), १२. अस्तित्ववादः (Existentialism), १३. संरचनावादः (Structuralism), १४. विघटन वादः (Post-structuralism). इत्यत्र नैके मतवादाः सन्ति। येषं महत्वं पाश्चात्य साहित्येषु भूयोऽवलोक्यते।

**१.८. अलङ्कारशास्त्राणां भविष्यश्च-**

प्रकृत्या प्राचीनकाले लक्ष्यग्रन्थान् परिशील्य पारम्परिकतया लक्षणग्रन्थाः विरचिताः आसन् । इदानीन्तनकाले तादृशानि काव्यानि लिखितानि येन अलंकारशास्त्राणि परिपुष्टितानि भविष्यन्ति । अतः अधुना अर्वाचीन काले काव्यमहाकाव्यचम्पुखण्डकाव्यदूतकाव्यानि च परिशील्य काव्यशास्त्राणि रचितव्यानि सन्तीति मे मतम्। अलङ्कारशास्त्रे भविष्यति कानि कार्याणि भवितुमर्हतीति विचारणीयम् ।

१. प्रथमतः अप्रकाशितपाण्डुलिपीनां प्रकाशनार्थं प्रयत्नः ।
२.इतरासु भाषासु स्थितानाम् अलङ्कारशास्त्राणां संस्कृतालङ्कार-शास्त्रेण सह तुलनात्मकमध्ययनम् ।
४. काव्यशास्त्रे स्थितस्य काव्यतत्वानां लक्षग्रन्थे कथं समन्वयः भवति तत्र गवेषणा ।
५.पाश्चात्यकाव्यतत्वानां संस्कृतकाव्यतत्वे समानता कथं भवितुमर्हति तत्र अध्ययनम् ।
६.अन्येषां संस्कृतशास्त्राणां कथं अलङ्कारशास्त्रे प्रभावः तदपि अन्वेषणीयः ।
७. अलङ्कारग्रन्थेषु काव्यतत्वानां कथं इतरेतरतया अन्तर्भावः तदपि अन्वेषणीयः ।
८. साध्यस्वरूपस्य रसस्यास्वादने कानि तत्वानि साधनानि तदपि अन्वेषणीयः ।

**उपसंहारः**

समस्त ज्ञानविज्ञानस्याक्षयो निधिः संस्कृतवाङ्मयम् । तत्रापि परमानन्दसन्देहजनकतया काव्यतत्वं मानवजीवनम् आनन्दमयं करोति सुखञ्च जनयति मानवीयमूल्योवोधं च विदधाति । वेदः स्वयमेव 'अमरकाव्यम्' इत्येनेन नाम्ना भुवन विदितः - 'देवस्य पश्य काव्यं न ममार न जीर्यति । साहित्यशास्त्रमेव मानवमात्रस्य श्रेयः प्रेयश्च सम्पादयति । साहित्य मानवस्य मनो विमली करोति इति ।

**टीप्पणी -**

1 काव्यमीमां-१
2 वक्रोक्तिकाव्यजिवीतम्-1.16
3 Aristotle's Theory of Poetry & fine art. P.221.
4 अभिज्ञानशाकुन्तलम्, 5.16
5 कुमारसम्भवम्, 5.9
6 रामायणम्-उत्तराकाण्डम्, 94.7
7 विष्णुपुराणम्, 3.13-34
8 काव्यादर्शः – 1.10
9 नाट्यशास्त्रम्,1.17
10 ऋगवेदः, 3.33.1
11 ऋग्वेदः- 4.58.3
12 ऋग्वेदः, 1.1.9
13 Felling and Form, p.212.